स्त्रदेशितं फलमनुष्ठातरीति" न्यायेन कृत्यादीनामन्तःकरणधर्म्मत्वेन तद्धर्म्मत्वौचित्यात् पुरुषे तु तानि तदविवेकादौपाधिकानि "प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते" गीतोक्तेः प्रकृतिगुणानां वास्तविककर्त्तृत्वसिद्धेः। "तस्मात् संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वे च तथा कर्त्ता भवत्युदासीन" इति सां॰का॰ राजसद्वृत्तेः अन्तःकरणस्यैव वास्तविककर्त्तृत्वोक्तेश्च क्रियाफलस्य सुखादेरपि तत्सामानाधिकरण्यम्। एतदाशयेनैव "तत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः। लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं स्वभावेन सां॰का॰ उक्तिः पुरुषे औपाधिकदुःखस्य सद्भावपरा"। किञ्च अन्तःकरणस्य तावत् सुखादिभिरन्वयव्यतिरेकौ सर्व्वसम्मतौ इत्यन्वयव्यतिरेकाभ्यां सिद्धकारणभावस्य तस्योपादानत्वमेव सांख्यादिभिः कल्प्यते न पुनस्तस्य निमित्तत्वं प्रकल्प्य आत्मनस्तत्र समवायिकारणत्वकल्पनं गौरवपराहतत्वात् निर्गुणत्वादिश्रुतिविरोधाच्च। सत्यपि तस्य स्वाभाविकाकर्त्तृत्वे भोक्तृत्वमस्त्येवेति सांख्या आहुः यथोक्तं सांख्यसूत्रभाष्ययोः "चिदवसानो भोगः" सू॰। "पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्य तादृशो भोगः सिद्धिरित्यर्थः। बुद्धेर्भोगस्य व्यावर्त्तनाय चिदवसान इति। चितः परिणामित्वरूपधर्म्मत्वादिशङ्कानिरासायावसानपदम्। चितौ भोगस्य स्वरूपे पर्य्यवसितत्वान्न कौटस्थ्यादिहानिरित्याशयः। तथाहि प्रमाणाख्यवृत्त्यारूढं प्रकृतिपुरुषादिकं प्रमेयं वृत्त्या सह पुरुषे प्रतिविम्बितं सद्भासते। अतोऽर्थोपरक्तवृत्तिप्रतिविम्बावच्छिन्नं स्वरूपचैतन्यमेव भानं पुरुषस्य भोगः प्रमाणस्य च फलमिति। ततश्च प्रतिबिम्बरूपेणार्थसम्बन्धे द्वारतया वृत्तीनां करणत्वमिति। तदुक्तं विष्णुपुराणे। "गृहीतानिन्द्रियैरर्थानात्मने यः प्रयच्छति। अन्तःकरणरूपाय तस्मै विश्वात्मने नमः" इति। राज्ञो हि करणवर्गः स्वामिने भोग्यजातं समर्पयतीति दृष्टमिति। भोगशब्दार्थश्चाभ्यवहरणम् आत्मसात्करणमिति यावत्। स च देहादिचेतनान्तेषु साधारणः। विशेषस्त्वयम्। अपरिणामित्वात् पुरुषस्य विषयभोगः प्रतिबिम्बादानमात्रम्। अन्येषां तु परिणामित्वात् पुष्ट्यादिरपीति। अयमेव च परिणामरूपः पारमार्थिको भोगः पुरुषे प्रतिषिध्यते "बुद्धेर्भोग इवात्मनोत्यादिभिरिति" मन्तव्यम्। अस्मिन् सूत्रे पुरुषस्यापि फलव्याप्यता सिद्धा चिदवसानताया एवात्र भोगत्ववचनादिति ननु कर्त्तुरेव लोके क्रियाफलभोगो दृष्टः। यथा सञ्चरत एव सञ्चारोत्थदुःखभोग इति तत् कथं बुद्धिकृतधर्म्मादिफलस्य सुखाद्यात्मिकाया अर्थोपरक्तबुद्धिवृत्तेर्भोगः पुरुषे घटेतेत्याशङ्कायामाह। "अकर्त्तुरपि फलोपभोगोऽन्नाद्यवत्" सू॰। बुद्धिकर्म्मफलस्यापि वृत्तेरुपभोगस्तदकर्त्तुरपि पुरुषस्य युक्तः अन्नाद्यवत्। यथान्यकृतस्यान्नादेरुपभोगो राज्ञो भवति तद्वदित्यर्थः। अविवेकस्य स्वस्वामिभावस्य वा भोगनियामकत्वात् तु नातिप्रसङ्गः। सुखदुःखादेः कर्म्मफलत्वमभ्युपेत्य बुद्धिगतं कर्म्मफलं पुरुषो भुङ्क्ते इत्युक्तम्। इदानीं पुरुषगतभोगस्यैव कर्म्मफलत्वं स्वीकृत्य बुद्धिकर्म्मणा पुरुष एव फलमुत्पद्यत इति मुख्यसिद्धान्तमाह। "अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः" सू॰। अथवा कर्तरि फलमेव न भवति सुखं भुञ्जीयेत्यादिकामनाभिर्भोगस्यैव फलत्वात्। अतो भोक्तृनिष्ठमेव फलं भवति "शास्त्रविहितं फलमनुष्ठातरीति" शास्त्रेषु कर्त्तुः फलावगमस्तु तत्सिद्धेरकर्तृनिष्ठाया भोगाख्यसिद्धेः कर्तृबुद्धावविवेकादित्यर्थः। योऽहं करोमि स एवाहं भुञ्ज इति हि लौकिकानुभव इति। या च सुखं मे भूयादित्यादिकामना सा पुत्रो मे भूयादितिवत् फलसाधनत्वे नैवोपपद्यते। भोगस्तु नान्यस्य साधनम्। अतः स एव फलमिति मुख्यः सिद्धान्तः। भोगस्य पुरुषस्वरूपत्वेऽपि वैशेषिकाणां मते श्रोत्रवत् कार्य्यता बोध्या सुखाद्यवच्छिन्नचितेरेव भोगत्वात्। अस्मिंश्च भोगस्य फलत्वपक्षे दुःखभोगाभाव एवापवर्गो बोध्यः। अथवा भोग्यतारूपस्वत्वसम्बन्धेन सुखदुःखाभावयोरेव फलत्वमस्तु तेन सम्बन्धेन धनादेरिव सुखादेरपि पुरुषनिष्ठत्वादिति" प्र॰भा॰ युक्तञ्चैतत् "कामः संकल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्व्वं मन एवेति" श्रुत्या कामादेरन्तःकरण-धर्म्मत्वोक्तेस्तत्फलस्य सुखादेस्तद्धर्म्मौचित्यात् तेषां मनोधर्म्मत्वमिति सांख्यादीनां मतमेवं वेदान्तिनाम् "तद्गुणसारत्वादिति" शा॰ सू॰ तथैव भाष्यकृता निर्णीतत्वात्। इयांस्तु विशेषः सांख्यैर्विषयेष्वपि त्रिगुणकार्य्यत्वात् सुखादिकमस्तीतिमन्यन्ते यथोक्तम्" सां॰कौमुद्याम्। "सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्